**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 14 Issue 1,Jan- 2024
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

# शब्दार्थसम्बन्ध: शाब्दबोधश्च

**– प्रो० धनीन्द्रकुमारझा:, आचार्य:**
**व्याकरणशास्त्रविद्याशाखा**
**केन्द्रीयसंस्कृतविश्वविद्यालय:, लखनऊपरिसर:**

वैयाकरणनये समस्तज्ञानराशेः व्यवहारस्य च मूलं शब्द एवाऽस्ति उक्तञ्च वाक्यपदीये महावैयाकरणेन भर्तृहरिणा-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते ।**[1]

सर्वमपि ज्ञानं शब्दानुविद्धमेवेति वैयाकरणा उरीकुर्वन्ति। यथा घटशब्देन घटघटत्वसमवाया: उपस्थाप्यन्ते तथैव नियततया शब्दोप्यवभासत इति भाव:।

शब्दार्थविचारक्रमे प्राथम्येन शब्दार्थसम्बन्धस्य चर्चाऽत्र क्रियते ।

**शब्दार्थसम्बन्धविचारः-**

शब्दार्थयोः सम्बन्धस्य ज्ञानं शब्दबोधस्य मुख्यं साधनमिति अंगीक्रियते वैयाकरणैः अन्यैः दार्शनिकैश्च । पदपदार्थयोः नियतसम्बन्धो भवति । तस्मात् कारणात् सर्वेभ्यः पदेभ्यः सर्वस्यापिअर्थस्य उपस्थितिर्न भवति । पदापदार्थयोः नियतसम्बन्धविषये दार्शनिकेषु मतभिन्नं सुतरां वरीवर्ति । शब्दशास्त्रिणः वैयाकरणाः व्याकरणस्यैव वेदाङ्गेषु प्रामुख्येन **"मुखं व्याकरणं स्मृतम्"**[2] इति भाष्यवचनाच्च वैयाकरणमतं प्रथमं प्रस्तौमि ।

वैयाकरणाः शब्दार्थयोः तादात्म्यसम्बन्धं स्वीकुर्वन्ति । तादात्म्यस्य लक्षणं नागेशभट्टेन वैयाकरणसिद्धान्तलघुमञ्जूषायां **तदभिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति**[3] उररीकृतम् । अस्यार्थो भवति भेदसहाभेदः, अर्थात् भेदसोद्ध्योऽभेदः । नागेशानुसारमर्थः शब्दाद्भिन्नो भवति अभिन्नोऽपि भवति । तस्मात् नियतोऽर्थः नियतशब्दात् भिन्नता भिन्नो भवति । सर्वेऽपि अर्थाः सर्वेभ्यः शब्देभ्यः भिन्नाभिन्ना न भवन्ति । अतः सर्वैः अर्थैः सह सर्वेषां शब्दानां तादात्म्यं न भवति । तस्मादेव कारणात् सर्वेभ्यः शब्देभ्यः सर्वेषामर्थानां बोधो न भवति । अयमेव पक्षः आलङ्कारिकाणामपि मान्योऽस्ति । महकविना कालिदासेन स्वकीये रघुवंशमहाकाव्यस्यारम्भे एव **"वागर्थाविव सम्पृक्तौ**[4] इति उक्तम् । अनेनवचसा महाकविना शब्दार्थयोः तादात्म्यसम्बन्धः एव संकेतितः । अत्र मीमांसकानां मतम्-मीमांसकानां मतमिदमस्ति यत् शब्दार्थयोः मध्ये एकः एतादृशः सम्बन्धोऽस्ति यः अन्यत्र कुत्राऽपि दृष्टिगोचरो नास्ति । तस्य सम्बन्धस्य नाम वाच्यवाचकभावसम्बन्धोऽस्ति । स एव सम्बन्धः संक्षेपेण वाच्यता वाचकता अभिधा इत्यादिनाम्ना व्यवह्रयते। एतस्मादेव कारणात् शब्दस्य वाचकत्वम् अर्थस्य च वाच्यत्वमभिधीयते । यस्मात् शब्दात् यः अर्थः वाच्यो भवति अथवा यः शब्दः यस्यार्थस्य वाचको भवति तस्मात् शब्दात् तस्य अर्थस्य बोधो भवति । अयमपि सम्बन्धः सर्वेषु पदेषु सर्वेषुअर्थेषु च मध्ये न भवति । किन्तु नियतेषु पदेषु नियतेषु अर्थेषु एव भवति। तस्मात् कारणात् मीमांसकनयेऽपि सर्वेभ्यः पदेभ्यः सर्वेषामर्थानां बोधो न भूत्वा नियतपदेभ्यः नियतार्थानां बोधस्यैव व्यवस्था दरीदृश्यते ।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 14 Issue 1,Jan- 2024
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

अत्र नैयायिकानां मतम्-नैयायिकनये शब्दार्थयोः यः सम्बन्धः अस्ति स संकेतरूपः अस्ति, स एव पदपदार्थयोः सम्बन्धः न्यायनये शक्तिनाम्ना व्यवहृयते । अभिधावाचकतादयः शक्तेः नामान्तरमस्ति । न्यायमते ईश्वरेच्छा शक्तिरूपेण स्वीकृताऽस्ति । विनिगमनाविहरात् सा एव सम्बन्धरूपा शक्तिः भेदत्रयेण निरूपिता भवति ।

(१) इदं पदमिममर्थं बोधयतुअर्थात् इदंपदं अस्य अर्थस्य बोधको भवेत् ।

(२) अयम् अर्थः अस्मात् पदात् बोधव्यः अयमर्थः एतत्पदजन्यबोधविषयो भवतु ।

(३) एतदर्थविषयको बोधः एतत्पदजन्यो भवतु ।

अर्थात् अस्य अर्थस्य बोधः अस्मात् पदाज्जन्यो भवतु । एषा त्रिप्रकारिका ईश्वरेच्छा पदपदार्थयोः सम्बन्धं द्योतयति। प्रथमेच्छायां पदविशेष्यक अर्थविषयकबोधजनकत्वप्रकारोऽस्ति। सा पदविशेष्यकअर्थविषयक-बोधजनकत्वप्रकारिका ईश्वरेक्षा अभिधीयते। द्वितीयायामिच्छायां अर्थविशेष्यकपदजन्यबोधविषयत्वप्रकारोऽस्ति। अर्थवशेष्यकपदजन्यबोध-विषयत्वप्रकारिका इश्वरेच्छा कथ्यते। तृतीयायामिच्छायामेतदर्थविषयबोधः विशेष्योऽस्ति। एतत्पदजन्यत्वप्रकारः अस्ति । एषा बोधविशेष्यकपदजन्यत्वप्रकारकेश्वरेच्छा कथ्यते । पदेन सह प्रथमेच्छायाः सम्बन्ध अस्ति अर्थविषयकबोधजनकत्वनिष्ठप्रकारतानिरूपितविशेषता । अनेन सम्बन्धेन ईश्वरेच्छायाः सम्बन्धित्वात् पदस्य शक्तिवाचकत्वं अभिधायकत्वं वा कथ्यते । अर्थेन सह तस्य सम्बन्ध गोऽस्ति पदनिष्ठदिशेष्यतानिरूपित जनकत्वनिष्ठप्रकारतानिरूपित-बोधनिष्ठ-प्रकारता निरूपितविषयित्व-सम्बन्धावच्छिन्नप्रकारतारूपः, यतोहि अर्थविषयकबोधजनकत्वं तस्यामिच्छायां विशेष्यभूते पदे विशेषणमस्ति । जनकत्वे बोधः विशेषणमस्ति । एवञ्च बोधे विषयितासम्बन्धेन अर्थः विशेषणमस्ति । अनेन सम्बन्धेन ईश्वरेछायाःसम्बन्धित्वात् अर्थः शक्यो वाच्योऽभिधेयश्च कथ्यते।पदेन सह द्वितीयायाः इच्छायाःसम्बन्धोऽस्ति विषयत्वनिष्ठ-प्रकारतानिरूपित बोध्य निष्ठप्रकारतानिरूपितजन्यत्वनिष्ठप्रकार-तानिरूपितप्रकारता। यतोहि विशेष्यभूतेऽर्थे पदजन्यबोधविषयत्वं विशेषणमस्ति। विषयत्वे बोधः विशेषणमस्ति बोधे च जन्यत्वं विशेषणम्, एवञ्च जन्यत्वे पदविशेषणमस्ति। अनेन रूपेण ईश्वरेच्छायाः सम्बन्धित्वात् पदस्य वाचकत्वमिधीयते । द्वितीयायामिच्छायामर्थः विशेष्यः तस्मादर्थेविशेष्यताऽस्ति । विशेष्यतासम्बन्धेन ईश्वरेच्छायाः सम्बन्धित्वात् पदाय वाचकत्वमभिधीयते। द्वितीयामिधायामर्थः विशेष्यः तस्मादर्थेविशेषयताऽस्ति । विशेष्यतासम्बन्धेन ईश्वरेच्छायाः सम्बन्धित्वात् सः वाच्यः इति अभिधीयते । तृतीयेच्छायामर्थविषयकः बोधः विशेष्योऽस्ति। एवञ्च पदजन्यत्वप्रकारकोऽस्ति-पदजन्यत्वनिष्ठप्रकारता-निरूपितबोधनिष्ठविशेष्यतानिरूपित विषयित्वसम्बन्धावच्छिन्न-अवच्छेदकतासम्बन्धेन ईश्वरेच्छायाः सम्बन्धित्वात् अर्थः वाच्यो भवति ।एवञ्च अर्थविषये बोधनिष्ठविशेष्यतानिरूपितजन्यत्वनिष्ठप्रकारता-निरूपितप्रकारतासम्बन्धेन ईश्वरेच्छायाः सम्बन्धित्वात् पदं वाचकं भवति। उक्ता त्रिप्रकारिका ईश्वरेच्छा विनिगमनाविहरात् पदानुयोगिकः अर्थप्रतियोगिकः अर्थानुयोगिकः पदप्रतियोगिकः सम्बन्धः कथ्यते ।अनेन प्रकारेण वैयाकरणमीमांसकनैयायिकानां सर्वेषां मते पदपदार्थयोः नियतसम्बन्धस्वीकारात् सर्वेभ्यः पदेभ्यः सर्वेषामर्थानां बोधाभावात् नियतपदेभ्यः नियतानामेवार्थानां बोधो भवति। एतादृशी व्यवस्था पदवाक्यप्रमाणज्ञैः व्यवस्थापिता ।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 14 Issue 1,Jan- 2024
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

**अधुना शाब्दबोधप्रक्रिया विचार्यते–**

शाब्दबोधः सर्वेभ्यः शास्त्रेभ्यः उपयोगितत्वं वर्तते । शब्दाज्जायमानः विजातीयबोधः अर्थात् संसर्गबोधः एव शाब्दबोधः कथ्यते । शब्दाद् आगतो जातः इत्यर्थे तत्र आगतः इति पाणिनिसूत्रेणअण् प्रत्यये सति शाब्द-इति शब्दः निष्पद्यते । शाब्दस्य बोधः शाब्दबोधः इति तत्र बोधो नाम कश्चिद् आत्मवृत्तिर्गुणः, तत्पर्यायाः बुद्धिर्ज्ञानं धीर्ग्रहः प्रतिपतिरित्याद्याः । तत्र - इन्द्रियात्मकप्रत्यक्षप्रमाणजन्यो बोधः प्रत्यक्षम्-यथा अयं घटः इत्यत्र । वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शरूपानुमानप्रमाणजन्यो बोधोऽनुमानम् । यथा पवर्तोवह्निमानिति । गवादिसादृश्यप्रत्यक्षोद्बुद्धसंस्कारजन्यगोसदृशो गवय इत्यादि वाक्यार्थस्मरण रूपोपमानजन्यो गवयपदवाच्योऽयमित्यादि शक्तिग्रह उपमानम्। वेदाः प्रमाणमित्यादि शब्दरूपप्रमाणजन्यबोधः शाब्दबोधः इति उच्यते। तदेवं **प्रत्यक्षानुमानोपमानशब्दाश्चत्वारः प्रमाणानि** ।[5] तज्जन्यास्तु प्रप्यक्षानुमानोपमानशब्दाश्चत्वारो बोधाः प्रमा इत्युच्यन्ते। प्रमाणशब्दश्च भावकरण–उभयव्युत्पत्या ज्ञानबोधको ज्ञानकरणीभूत-इन्द्रियादिबोधकश्च ।

अधुना शाब्दबोधस्थलश्च संसर्गबोधः विचार्यते प्रायेण दृश्यते यत् यस्मात् कस्मात् शब्दात् यस्य कस्यापि अर्थस्य बोधो नभवति, किन्तु यदर्थनिरूपिता शक्तिः पदेतिष्ठति तस्मात् पदात् तस्यैवार्थस्य बोधो भवति । उक्तञ्च- तत् पदजन्यतदर्थविषयक शाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनतदर्थविषयोपस्थितिः कारणम् । अनेन प्रकारेण पूर्वं शक्तिग्रहः ततः उपस्थितिः ततः शाब्दबोधः इदमस्ति शाब्दबोधीयस्थलस्य पौर्वापर्यम्। फलमिदं भवति यत् यस्याः व्यक्तेः अर्थबोधकशक्तेः ज्ञानं नास्ति तस्य कृते तस्मात् शब्दात् तस्य अर्थस्य बोधो न भवति। एवमेव एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवति, यथा-हस्तिं दृष्टा हस्तिपकस्य स्मरणं भवति। अनेनैव प्रकारेण शब्दं श्रुत्वा समवायसम्बन्धेन आकाशस्य स्मरणेऽपि तस्य आकाशरूपअर्थस्य शाब्दबोधे भानं न भवति, यतोहिं एषा आकाशोपस्थितिः पदनिष्ठशक्तिज्ञानाधीना नास्ति, एषा तु एकसम्बन्धिज्ञानविधया अस्ति । शक्तिग्रहः यत्प्रकारको यद्विषयको च गृहीतो भवति शाब्दबोधोऽपि तत्प्रकारकः तद्विशेष्यकः एव भवति । यथा - घटपदे घटत्वप्रकारकघटविशेष्यकशक्तेः गृहीतत्वात् 'अयं घटः' अस्य वाक्यस्य श्रोतुः घटत्वप्रकारकघटविशेष्यक एव बोधो भवति । तत्र घटप्रकारकघटत्वविशेष्यकस्य बोधस्य कल्पनाऽपि कर्तुं न शक्यते । उक्तञ्च–

**पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः ।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी** ।[6]

शाब्दबोधे पदज्ञानं करणं भवति । **"व्यापारवदसाधारणं कारणं करणम्"**[7] इति नियमेन करणं व्यापारवत् भवितव्यम् । व्यापारस्यैव नामान्तरं द्वारमिति । द्वारस्य लक्षणम्- **"तज्जन्यत्वे सति तज्जन्यजनकत्वं द्वारमिति"**[8] शाब्दबोधस्थले पदार्थज्ञानस्य द्वारत्वं कथ्यते । पदार्थज्ञानं पदज्ञानजन्यत्वे सति पदज्ञानजन्यशाब्दबोधस्य जनकत्वात् द्वारं भवति । शक्तिज्ञानन्तु शाब्दबोधे सहकारिकारणं मन्यते। एषा शाब्दबोधस्थलीया सामान्या प्रक्रिया अस्ति । वस्तुतस्तु क्रियां विना कोऽपि निराकांक्षबोधो **न** भवति। "सर्वं वाक्यं क्रियायां परिसमाप्यते" इत्यभियुक्तवचनात् शाब्दबोधस्य निष्कृष्टोऽर्थः वाक्यार्थबोध इति । वाक्यार्थबोधें वाक्यघटकानि पदानि स्वमर्थं स्वातन्त्र्येन कथ्यन्ते, तस्मात् तेषां पदानां अर्थानाञ्च यः पारस्परिकः सम्बन्धोऽस्ति स एव वाक्यार्थ इति । अनेन प्रकारेण शाब्दबोधस्यार्थः संसर्गबोध एव सिद्धो भवति ।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 14 Issue 1,Jan- 2024
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

"मुखं व्याकरणं स्मृतम्" इति भाष्यवचनात् व्याकरणस्यैव प्राधान्यत्वात् पूर्वं वैयाकरणाभिमतः व्यापारमुख्यविशेष्यकः शाब्दबोधः प्राथम्येन प्रस्तुयतेयथा पूर्वं प्रदर्शितं क्रियां विनाकस्यापि निराकांक्षबोधो न भवति तस्मात् क्रिया एव शब्दबोधस्य मुख्यं साधनमिति। शाब्दबोधे क्रियायाः नान्तरीयकताऽस्ति। क्रियावाचको धातुर्भवति। धातोः अर्थद्वयमस्ति फलं व्यापारश्च। फलं व्यापारजन्यं भवति। तस्मात् तत्र जन्यजनकभावसम्बन्धो भवति। धातोः तिबादिप्रत्ययान् संयोज्य तिङ्गन्तपदं निर्मीयते। तिङ् प्रत्ययस्य अर्थाः **कर्ताकर्मसंख्याकालाश्च भवन्ति**।[9] एषु कर्ता वृतित्वसम्बन्धेन व्यापारस्य विशेषणं भवति कर्म च वृतित्वसम्बन्धेन फले विशेषणं भवति। उक्तश्चापि भूषणे "तिङर्थस्तु विशेषणम्" इति। तिबर्थसंख्या तु कर्तृवाच्ये कर्तुः विशेषणं भवति कर्मवाच्ये च कर्मणः विशेषणं भवति। तिबर्थकालस्तु वृतित्वसम्बन्धेन व्यापारस्य विशेषणं भवति।

शाब्दबोधे व्यापार एव मुख्यविशेष्यो भवति। यद्यपि **"प्रकृतिप्रत्ययार्थयोः प्रत्यायार्थस्यैव प्राधान्यम्"** [10] इति वचनात् प्रकृतिरर्थात् यः धातुरस्ति तस्य अर्थस्य प्रधानता अर्थात् व्यापारस्य प्रधानतायाः औचित्यम् सन्दिग्धं प्रतिभाति, तथापि **"भावप्रधानमाख्यातम्"** [11] इति निरुक्तवचनात् धात्वर्थभावनायाः क्रियायाः वा प्रधानता वैयाकरणानामभिप्रेता अस्ति। एवञ्च वैयाकरणानुसारं "रामो ग्रामं गच्छति, एतत् वाक्यघटक-गम् धातोः अर्थस्य संयोगानुकूलव्यापारस्य एकस्याङ्गस्य संयोगे ग्रामस्य वृतित्वसम्बन्धेन अन्वयो भवति। अनेनैव प्रकारेण कर्तुः रामस्यापि वृतित्व सम्बन्धेन व्यापारेऽन्वयो भवति। एकत्वसंख्या ग्रामस्य विशेषणं भवति। एवञ्च वर्तमानकालः व्यापारस्य विशेषणं भवति। अनेन प्रकारेण रामो ग्रामं गच्छति अस्य वाक्यस्य शाब्दबोधो भवति-

रामाभिन्नैकत्वावच्छिन्न–कर्तृवृतिग्रामनिष्ठसंयोगानुकूलो वर्तमानकालिको व्यापारः। अत्र व्यापारस्य विशेष्यता स्पष्टा एव। कर्मवाच्ये फलविशेष्यकः शाब्दबोधो भवति यथा "रामेण ग्रामो गम्यते" अस्य वाक्यस्य शाब्दबोधः इत्थं भवति–

रामाभिन्नकर्तृवृत्तिवर्तमानकलिकव्यापारजन्यग्रामाभिन्नैकत्वावच्छिन्नाश्रयवृतिः संयोगः। अत्र धात्वर्थ-फलस्य विशेषता स्पष्टा एव।

**शाब्दबोधविषये नैयायिकानां मतम् -**

नैयायिकानां कथनमस्ति यत् आख्यात्तिङ्गर्थस्यार्थः क़र्ता कर्म इति स्वीकरणमनुचितमस्ति यतोहि कर्ता कृतिमान् भवति, तस्मात् कर्तृपदस्य शक्यतावच्छेदकः कर्तृत्वमर्थात् कृतिमत्वं भविष्यति। कर्तृमत्वं कृतिश्च एकमेव वस्तु अस्ति, अनेन प्रकारेण कृतेः शक्यतावच्छेदकत्वात् तस्य नानात्वमरिहार्यमस्ति। यतोहि प्रत्येकं कर्तृवृत्तिः कृत्तिः भिन्ना भिन्ना अस्ति। अनेन प्रकारेण शक्यतावच्छेदके गौरवमुद्भाव्य नैयायिकेन तिङः शक्तिः कृतावेव स्वीकृता। कृतौ शक्तिस्वींकारात् कृतित्वं शक्यतावच्छेदकं भवति यदेकमस्ति। एषा कृतिः चैत्रादिकर्तरि प्रकारीभूय भाषते, अर्थात् चैत्रनिष्ठविशेष्यतानिरूपितप्रकारत्वावच्छिन्नविषयतावती भवति। यत्र वैयाकरणाः आख्यातार्थसंख्यां कर्तृकर्मणोः विशेषणं स्वीकृत्य आख्यातार्थसंख्या-निष्ठप्रकारतानिरूपित- विशेष्यता सम्बन्धेन शाब्दबोधं प्रति आख्यातजन्यकर्तृकर्मणोरूपस्थितिः कारणम् एतादृशं कार्यकारणभावं

स्वीकृतवन्तः। तत्रैव नैयायिकाः आख्यातार्थसंख्याया अन्वयः प्रथमान्तार्थे स्वीकुर्वन्ति। नैयायिकमते **आख्यातार्थसंख्याप्रकारकबोधम्प्रति प्रथमान्तपदजन्योपरिस्थितिः कारणम्**[12] एतादृशः कार्यकारणभावसम्बन्ध

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 14 Issue 1,Jan- 2024
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

भवति । यद्यपि कर्तृवाच्ये कर्तुः कर्मवाच्ये च कर्मणः प्रथमान्तत्वात् तयोः संख्यायाः अन्वयं स्वीकरणे वैयाकरणनैयायिकयोः मध्ये किमपि पार्थक्यं न प्रतीयते । तथापि नैयायिकमते 'चन्द्र इव मुखं दृश्यते' अस्मिन् वाक्ये मुखे एकत्वस्य अन्वयः अपरिहार्यो भविष्यति । अस्य दोषस्य अपाकरणार्थं **"संख्यान्वयं प्रति इतराविशेषणीभूतप्रथमान्तपदजन्योपस्थितिः कारणम् ।"**[13] एतादृशः कार्यकारणभावः नैयायिकेन स्वीकृतः । अत्र संदेहो नास्ति यत् एतादृशे कार्यकारणभावस्वीकरणे गौरवं भवत्येव ।

यद्यपि "प्रकृतिप्रत्ययार्थस्य प्राधान्यम्" अत्र बद्धादरः नैयायिकसम्प्रदायः धात्वर्थव्यापारस्य प्रत्ययार्थकृतेः विशेषणं स्वीकरोति । व्यापारविशेषिता कृतिः प्रथमान्तार्थकर्तुः विशेषणं भवति । अनेन प्रकारेण नैयायिकमते चैत्रो ग्रामं गच्छति अस्मिन् वाक्ये "ग्रामाभिन्नः आश्रयवृत्तिसंयोगानुकूल व्यापारानुकूल–वर्तमानकालिककृत्तिमान् एकत्वावच्छिन्नः चैत्रः" अयमेव प्रथमान्तार्थमुख्यविशेष्यको शाब्दबोधः नैयायिकानामभिमतो अवबुद्ध्यते ।

**मीमांसकमते** फलमात्रं धात्वर्थः व्यापारश्च आख्यातप्रत्ययार्थ इति । एवञ्च आख्यातार्थव्यापारं प्रति धात्वर्थफलं विशेषणं भवति । मीमांसकनयेऽपि व्यापारमुख्यविशेष्यको शाब्दबोधो भवति । मीमांसकः व्यापारमेव भावनाशब्देन अभिधीयते । अस्य मते 'चैत्रः तण्डुलं पचति' अस्य वाक्यस्य शाब्दबोधो भवति- तण्डुलभाव्यिका पाककरणिका चैत्रकर्तृका भावना। कर्मप्रत्ययस्थलेऽपि आख्यातार्थभावना एव मुख्यविशेष्यत्वेन तिष्ठति ।

**शाब्दबोधस्य कारणसाधनानि–**

शाब्दबोधः यैः साधनैः भवति तानि साधनानि सप्तसंख्याकानि सन्ति । (१) पदज्ञानम् (२) पदपदार्थसम्बन्धज्ञानम् (३) पदार्थस्मरणम् (४) आकांक्षा (५) सन्निधिः (६) योग्यता (७) तात्पर्यज्ञानञ्च शाब्दबोधाय साकांक्षपदानाम आवश्यकता भवति । पदानां सन्निधेः बाधाभावरूपायाः योग्यतायाश्च शाब्दबोधे महत्वपूर्ण स्थानं वर्तते । केचित् तु शाब्दबोधे तात्पर्यज्ञानस्य उपकारकत्वं नावमन्यन्ते। शुकाद्युच्चरितेषु वाक्येषु तस्य तात्पर्यज्ञानाभावादपि बोधो भवत्येव । तस्मादेव कथ्यते आकांक्षा योग्यता, सन्निधिश्च वाक्यार्थज्ञाने हेतुरिति ।

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 14 Issue 1,Jan- 2024
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

**सन्दर्भग्रन्थ:**

1 वाक्यपदीये 1/123
2 महाभाष्ये, पश्पाह्निके
3 परमलघुमञ्जूषायां, शक्तिनिरूपणे
4 रघुवंशमहाकाव्यम्, 1/1
5 न्यायसिद्धान्तमुक्तावली, शब्दखण्डे
6 न्यायसिद्धान्तमुक्तावली, शब्दखण्डे
7 न्यायसिद्धान्तमुक्तावली, प्रत्यक्षखण्डे
8 न्यायसिद्धान्तमुक्तावली, शब्दखण्डे
9 वैयाकरणभूषणसार:, धात्वर्थप्रकरणे
10 परमलघुमञ्जूषायाम्
11 निरुक्ते
12 वैयाकरणभूषणसार:, धात्वर्थप्रकरणे
13 वैयाकरणभूषणसार:, धात्वर्थप्रकरणे